॥ श्रीजिनाय नमः ॥

# ॥ श्रीसुरप्रियमुनिकथा ॥

( कर्ता–श्रीकनककुलगणी )

इदं पुस्तकं जामनगरवास्तव्य पं. हीरालाल हंसराजेन स्वकीये
श्रीजैनभास्करोदयमुद्रणालये मुद्रितव्यम्

वीर सं. २४६४ विक्रम सं. १९९४ सने १९३७

किं. रु. ०–४–०

Scanned by CamScanner

॥ श्री जिनाय नमः ॥

# ॥ श्रीसुरप्रियमुनिकथा ॥

( कर्ता—श्रीकनककुशलगणी )

प्रणम्य महिमागारं । श्रीपार्श्वं पुरुषोत्तमं ॥ सकलाभीष्टसंसिद्धि—साधने कल्पपादपं ॥ १ ॥ गुरुप्रसादमासाद्य । सद्यो दुरितभेदकं ॥ स्वान्योपकारकं वक्ष्ये । संबंधं बंधबंधुरं ॥ २ ॥ युग्मं ॥ पुरे राजगृहे नाम्ना । चैत्ये गुणशिलाभिधे ॥ सुरासुरनृसेव्यांह्रिः । श्रीवीरः समवासरत् ॥ ३ ॥ तस्याद्यो गणभृद्भूरि—लब्धिपात्रं पवित्रहृत् ॥ भगवान् गौतमस्वामी । नित्यं षष्ठादिसत्तपाः ॥ ४ ॥ चतुर्ज्ञानधरो धीमान् । विनयाद्रचितांजलिः ॥ भक्त्याभिवंद्य भगव—त्पादावेवं व्यजिज्ञपत् ॥ ५ ॥ युग्मं ॥ यः पश्येदात्मनो दोष—मात्मनिंदापरायणः ॥ तस्य स्यात्किं फलं नाथ । कथ्यतां कृपया मम ॥ ६ ॥ उवाच

भगवानिंद्र—भूते श्रृणु वचो मम ॥ सावधानमना वत्स । रक्षणीयं निजे हृदि ॥ ७ ॥ स्वश्लाघा परनिंदा च । लक्षणं निर्गुणात्मनां ॥ परश्लाघा स्वनिंदा च । लक्षणं सद्गुणात्मनां ॥ ८ ॥ गुणानुरागिणः स्वल्पा—स्तेभ्योऽपि गुणिनस्ततः ॥ गुणिनो गुणरक्ताश्च । तेभ्यः स्वगुणवीक्षिणः ॥ ९ ॥ स्वनिंदाप्राप्त-सौख्यस्य । सुरप्रियमहामुनेः ॥ प्रतिबोधविधानार्थं । कथयामि कथानकं ॥ १० ॥

जंबूद्वीपेऽत्र भरते । सुशर्मा नगरी वरा ॥ वापीवप्रविहाराद्यै–र्भूषिता जनतान्विता ॥ ११ ॥ चंद्र-श्चंद्रोज्ज्वलयशा । भूपोऽभूद्भूरिविक्रमः ॥ न्यायनिष्ठो गुणश्रेष्ठो । हृष्टो मनसि सर्वदा ॥ १२ ॥ तस्या-ग्रमहिषी नाम्ना । गुणतारेति शीलभृत् ॥ गतिर्यथा जराभीरो—र्विधोरिव च रोहिणी ॥ १३ ॥ आकृत्या सुंदरः श्रेष्ठी । ख्यातो नाम्नापि सुंदरः ॥ मदनश्रीश्च तस्यासी—द्वल्लभापरदुर्लभा ॥ १४ ॥ तयोश्च तनयो जज्ञे । ज्ञानविज्ञानशोभितः ॥ सुरप्रिय इति ख्यातो । गुणानामेकमंदिरं ॥ १५ ॥ क्रमेण यौवनारंभे । स पित्रा परिणायितः ॥ द्विधा रूपवती कन्या । शीलाऽलंकारराजिनो ॥ १६ ॥ अथाशुभोदयात्तस्य । निर्धनत्वमजायत ॥ सर्वेऽपि दिवसाः कस्य । सदृशाः स्युर्निरंतरं ॥ १७ ॥ यतः—कस्य वक्तव्यता नास्ति ।



Scanned by CamScanner

को जातो न मरिष्यति । केन न व्यसनं प्राप्तं । कस्य सौख्यं निरंतरं ॥ १८ ॥ मृतदुर्गतयोर्मध्ये । वरं मृतो न दुर्गतः ॥ मृतो हि लभते वारि । तद्बिंदुमपि नापरः ॥ १९ ॥ मरणसमं नत्थि भयं । दारिद्दसमो अ वेरिओ नत्थि ॥ पंथसमा नत्थि जरा । खुहासमा वेयणा नत्थि ॥ २० ॥ वरं वनं व्याघ्रगणैर्निषेवितं । वरं प्रवेशो ज्वलिते हुताशने ॥ वरं विषं प्राणविनाशि भक्षितं । न बंधुमध्ये धनहीनजीवितं ॥ २१ ॥ स्थानांतरे नराणां हि । जातु चेज्जायते धनं ॥ कर्षकाणां यथा बीज—मूचुरिति मनीषिणः ॥ २२ ॥ परस्परं विचिंत्यैवं । दत्वा शिक्षां निजे गृहे । जग्मतुस्तातपुत्रौ तौ । देशांतरं धनेच्छया ॥ २३ ॥ अविच्छिन्नप्रयाणैस्तौ । गच्छंतावटवीमितौ ॥ उपविष्टौ वटतले । श्रांतौ विश्रामहेतवे ॥ २४ ॥ पश्यतःस्म प्रपुन्नाटं । तौ तत्र श्वेतमद्भुतं ॥ चक्राते च ततश्चिंता—मिति चित्तनिवासिनीं ॥ २५ ॥ अस्याधस्ताद्धनं भूरि । ध्रुवं संभाव्यतेतरां ॥ पुरा गुरुमुखादेत—द्वचनं शृणुवो यथा ॥ २६ ॥ अमंत्रमक्षरं नास्ति । नास्ति मूलमनौषधं ॥ निर्धना पृथिवी नास्ति । आम्नायः खलु दुर्लभाः ॥ २७ ॥ विशिष्य शिष्यते किंचि—त्तद्भिज्ञानमप्यहो ॥ प्रस्रवे च खरादीनां । चतुर्भिश्चरणैः समैः ॥ २८ ॥ बहुपक्षिपदे चार्क—वारे खंजन-



Scanned by CamScanner

विट्पदे ॥ छगणांतर्गतैरंड—बीजांकुरपदेऽपि च ॥ २९ ॥ खंजरीटादिकानां च। मैथुनस्थानके निधिः ॥ प्ररोहे प्रपुनाटादे—श्चापि बिल्वपलाशयोः ॥ ३० ॥ त्रिभिर्विशेषकं ॥ प्ररोहस्य च काश्येंऽल्पः । स्थैल्ये- ऽनल्पः पुनर्निधिः ॥ तद्गतक्षीरवर्णानु—सारि सारं निधो तथा ॥ ३१ । निश्चित्य द्रविणं तत्र । प्रोत्थितौ तद्गताशयौ ॥ गत्वा च पुरतः किंचि— त्तस्थतुस्तौ तरोस्तले ॥ ३२ ॥ पृथक्सुषुपतुस्तत्र । नक्तं कपट- निद्रया ॥ पिता तु चिंतयत्येवं । निद्रां गच्छेत्सुतो यदि ॥ ३३ ॥ गत्वा तदा समुन्मूल्य । प्रपुनाटं पुरा- तनं ॥ धनं समानयाम्याशु । दारिद्र्यदववारिदं ॥ ३४ ॥युग्मं ॥ सुते जाग्रति चेद्यामि । भागं गृह्णात्ययं तदा ॥ आयुर्वित्तं निजं पुण्यं । न वाच्यानि परस्य यत् ॥ ३५ ॥ सुतस्यापि मनस्येषा । चिंता समधि- काभवत् ॥ कस्यात्मा न वशश्चक्रे । कामिन्या कनकेन च ॥ ३६ ॥ यतः—को लोहेण न निहओ । कस्स न रमणीइ भोलिअं हिययं ॥ को मच्चुणा न गहिओ । को गिद्धो नेव विसएहिं ॥ ३७ ॥ विज्ञाय तनयं सुप्तं । समुत्थाय ययौ द्रुतं ॥ निकटे प्रपुनाटस्य । सुंदरो लोभपीडितः ॥ ३८ ॥ ॐनमो धरणेंद्राय । ॐनमो धनदाय च ॥ इत्यादिमंत्रमंत्रेणा—पूर्वमूर्ध्नि चखान च ॥ ३९ ॥ अधस्तात्प्रपुनाटस्य । रत्नश्रेणी



Scanned by CamScanner

मनोहरं ॥ वीक्षतेस्म महामूल्यं । स हारं निधिमध्यगं ॥ ४० ॥ तं गृहीत्वा तथान्यत्र । स्थाने संगोप्य यत्नतः ॥ सुंदरो वलितः पश्चा—द्धनप्राप्तिप्रहृष्टहृत् ॥ ४१ ॥ क्षणं सुप्त्वा समुत्थाय । तनयोऽपि धना-शया ॥ तमुद्दिश्याचलन्मार्गे । मिलतिस्मांतरा पिता ॥४२॥ तस्य शंकामकुर्वाणः । सोऽगाद्द्रुतटले द्रुतं ॥ उन्मूलितं प्रपुन्नाटं । दृष्ट्वा दूनो व्यचिंतयत् ॥ ४३ ॥ पित्राग्राहि धनं नून—मिति निश्चित्य चेतसा ॥ उपेत्य पितरं सोऽथा—पृच्छल्लोभाभिभूतहृत् ॥ ४४ ॥ मूलादुन्मूलितः केन । प्रपुनाटः पुरातनः ॥ मनो-रथो द्दरिद्रस्य । विधिनेव विचिंतितः ॥ ४५ ॥ सुंदरोऽप्यवदज्जाने । नाहं वृत्तांतमस्य भोः ॥ तत् श्रुत्वा कुपितः पुत्रो । जघान पितरं क्रुधा ॥ ४६ ॥ यतः—रतिंधा १ दोहंधा २ | जच्चंधा ३ माय ४ माण ५ कोवंधा ६ ॥ कामंधा ७ लोहंधा ८ | इमे कमेणं विसेसंधा ॥ ४७ ॥ कोहो पीइं पणासेइ । माणो विणयनासणो ॥ माया मित्ताणि नासेइ । लोहो सव्वविणासणो ॥ ४८ ॥ रूपं जरा सर्वसुखानि तृष्णा । याञ्चा महत्त्वं गुणमात्मशंसा ॥ खलेषु सेवा पुरुषाभिमानं । चिंता बलं हंति दयां च लक्ष्मीः ॥ ४९ ॥ ततो मृत्वा पिता जातो । गौधेरो हाररक्षकः ॥ सुतो लेभे न तत्स्थानं । परितः प्रविलोकयन् ॥ ५० ॥

अहर्निशं वीक्षमाणो । निधिस्थानं सुरप्रियः ॥ भववासमिवाभव्यो । न मुमोच तदंतिकं ॥ ५१ ॥ गोधा-सुतोऽन्यदा हारं । वहिर्नीत्वा मनोहरं ॥ तस्योपरि लुलोठोच्चै—रहो लोभविजृंभितं ॥ ५२ ॥ सुरप्रियो निरीक्ष्याथ । तं द्रुतं ग्रहणोत्सुकः ॥ हत्वा गौधेरमादत्त । हारं सार्धं महांहसा ॥ ५३ ॥ धनार्थमंगनार्थं च । गर्हितं कर्म किं न हि ॥ नरः प्रकुरुते राग—द्वेषाभ्यां प्रेरितोऽधिकं ॥ ५४ ॥ यावत्सजीवसूत्रासौ । वलनाय महामुनिं ॥ कायोत्सर्गस्थितं तावत् । दृष्ट्वा शंकाकुलोऽभवत् ॥ ५५ ॥ गृहं गत्वा स योषायाः । सर्वं वृत्तांतमादितः ॥ कथयामास साप्येव—मवदच्छृणु मे वचः ॥ ५६ ॥ स मुनिर्हारवृत्तांतं । नृपस्याग्रे वदिष्यति ॥ नृपोऽपि धनलुब्धात्मा । हारमेनं हरिष्यति ॥५७॥ षट्कर्णो भिद्यते मंत्र-श्चतुःकर्णो न भिद्यते ॥ ततोऽयं सर्वथा वध्यो । मुनिरूपेण नो रिपुः ॥५८॥ विमृश्येति चचालासौ । हननार्थं तपस्विनः ॥ आगतश्च क्रमेणास्य । निकटं कटुभाषकः ॥ ५९ ॥ मनोगतं मुने मे त्वं । भोः समाख्याहि मत्वरं ॥ अन्यथा त्वां हनिष्यामि । स्वहस्तेनामुनासिना ॥ ६० ॥ कायोत्सर्गं पारयित्वा । ज्ञानत्रयधरो मुनिः ॥ लाभं विभाव्य प्रोवाच । वाचं वाचंयमाग्रणी ॥ ६१ ॥ भवान् पूर्वभवे हस्ती । समभूयत्र कानने ॥ आसीत्तत्रैव ते



Scanned by CamScanner

तातो । मृगारातिर्बलोत्कटः ॥ ६२ ॥ स गजोऽघाति तेनैव। सिंहेनाजन्मवैरिणा ॥ सोऽपि सिंहोऽष्टापदेन। निहतो नरकं ययौ ॥ ६३ ॥ नरकात्सिंहजीवोऽथ । निःसृत्याजनि सुंदरः ॥ त्वभूर्गजजीवोऽपि । भ्रांत्वा भूरितरान् भवान् ॥ ६४ ॥ त्वयापि पूर्ववैरेण । हतो लोभमिषात्पिता ॥ मृत्वाभूत्सोऽपि गौधेरो । हाररक्षापरायणः ॥ ६५ ॥ तं निहत्यापि भवता । हारोऽग्राहि दुरात्मना ॥ विपद्य स तु गौधेरः । श्येनत्वेनोदपद्यत ॥ ६६ ॥ मत्तः शंकाकुलस्त्वं चा—त्रागतो हननेच्छया ॥ उक्तातीतभवाख्याना । मया वार्ता मनोगता ॥ ६७ ॥ सुरप्रियो निशम्याथ । वृत्तांतं मुनिनोदितं ॥ शांतक्रोधः समुत्पन्न—वैराग्योऽचिंतयद्हृदि ॥ ६८ ॥ दुःकृतेनामुना नून—मतिनिंद्येन मे पदं ॥ भविता नैव नरके । महादुःखनिकेतने ॥ ६९ ॥ अतिमूढात्मना पाप—वृक्षोऽयं रोपितो मया ॥ निंद्यपुष्पः कटुफलो । बहुधा दुःखदायकः ॥ ७० ॥ यतः—वहमारणअप्भक्खाण—दाणपरधणविलोवणाईणं ॥ सव्वजहन्नो उदओ । दसगुणिओ इक्कसि कयाणं ॥ ७१ ॥ तिव्वयरे उ पउसे । सयगुणिओ सयसहस्सकोडीगुणो ॥ कोडाकोडीगुणो वा । हुज्ज विवागो बहुतरो वा ॥ ७२ ॥ सुरप्रियो मुनिं प्रोचे । कृतदुःकर्मदूनहृत् ॥ हे कारुण्यमहांभोधे । कर्तव्यं मे समादिश

॥ ७३ ॥ मुमुक्षुरवदद्भद्र । विधेयो धर्म आर्हतः ॥ रागद्वेषौ महाशत्रू । निहंतव्यौ सुखैषिणा ॥ ७४ ॥ यतः—को दुक्खं पाविज्जा । कस्स व सुक्खेहिं विम्हओ हुज्जा ॥ को व न लभिज्ज मुक्खं । रागद्दोसा जइ न हुज्जा ॥ ७५ ॥ चतुःकषायाः क्रोधाद्या—स्त्याज्या दुर्गतिहेतवः ॥ करणं खलु वैरस्य । सद्धर्मधनतस्कराः ॥ ७६ ॥ कषाया देहकारायां । चत्वारो यामिका इव ॥ यावज्जाग्रंति पार्श्वस्था—स्तावन्मोक्षः कुतो नृणां ॥ ७७ ॥ तन्निशम्य मुनेर्वाक्यं । परं वैराग्यमुद्वहन् ॥ नत्वा च चरणं तस्य । स जगाम निजं गृहं ॥७८॥ वृत्तांतं सकलं भीरोः । स निवेद्यावदत्प्रिये ॥ हारं समर्प्य भूपस्य । प्रव्रजिष्यामि निश्चितं ॥ ७९ ॥ तथा कृत्वा स जग्राह । चारित्रं गुरुसन्निधौ ॥ विनयादिगुणोपेतः । श्रुतमध्यैष्ट चानिशं ॥८०॥ तपोधनो गतधनो । निर्ममत्वो जितेंद्रियः ॥ समशत्रुसुहृद्वर्गो । विचचार पुरादिषु ॥ ८१ ॥ युग्मं ॥ सुशर्माभिधपुर्यंते । सोऽन्यदा साधुसत्तमः ॥ कायोत्सर्गं चकारोच्चैः । स्वशरीरेऽपि निःस्पृहः ॥ ८२ ॥ अथ राज्ञोऽग्रमहिषी । तल्पे हारं विमुच्य तं ॥ पावित्र्यैकनिदानाय । स्नानाय समुपाविशत् ॥ ८३ ॥ उपरि भ्रमता तेन । श्येनेनालक्षि दूरतः ॥ हारश्चाग्राहि चंचवासा—वुत्पपात ततोंबरे ॥ ८४ ॥ आगत्य निकटे तस्य ।

साधोर्ध्यानजुषो गले ॥ पक्षी चिक्षेप तं हारं । वैरशुद्धिविधित्सया ॥ ८५ ॥ राज्ञो स्नात्वा समुत्थाय । वस्त्राणि परिधाय च ॥ यावन्निरीक्षते हारं । तावत्तं सा न पश्यति ॥ ८६ ॥ तथा दूतीमुखेनैषा । प्रवृत्तिः पत्युरंजसा ॥ ज्ञापिता सोऽपि पुरुषा—नादिदेशास्य शुद्धये ॥ ८७ ॥ क्रूरास्ते पुरुषास्तूर्णं । चतुर्दिक्षु प्रधाविताः ॥ पुरारामादिकं स्थानं । वीक्षमाणाः पदे पदे ॥ ८८ ॥ मुनिं विलोकयामासु—रनघं प्रतिमाधरं ॥ कानने तेन हारेण । विभ्राजिगलकंदलं ॥ ८९ ॥ युग्मं ॥ तमेव चौरं विज्ञाय । सलोप्त्रं भूपतेः पुरः ॥ बध्ध्वा नरा नयंतिस्म । धिग्धिग्विलसितं विधेः ॥ ९० ॥ हारं जग्राह भूपालो । भूरितर्जनतत्परः ॥ स्वीचक्रे च मुनिर्मौनं । शुभध्याननिबद्धधीः ॥ ९१ ॥ ततो राज्ञा मुनेस्तस्य । कंठपाशः प्रदापितः ॥ सुरसान्निध्यतस्तूर्णं । स तु तुत्रोट तंतुवत् ॥ ९२ ॥ द्वितीयेऽपि तृतीयेऽपि । वारके पुण्ययोगतः ॥ इत्थं जाते महीपालो । व्याकुलो मनसाभवत् ॥ ९३ ॥ समादिदेश भूभर्ता । पुनरादेशकारिणः ॥ शूल्यामारोपणीयोऽयं । दुर्बुद्धिः पारिपंथिकः ॥ ९४ ॥ ततस्तैर्भूपवचना—द्रासभे कारितस्थितिः ॥ निंद्यमानस्ताड्यमानो । दोषग्रहणपूर्वकं ॥ ९५ ॥ स्मृतप्राचीनदुःकर्म—विपाकः क्षमयान्वितः ॥



Scanned by CamScanner

स साधुपुंगवो वध्य—भूमिकायामनीयत ॥ ९६ ॥ युग्मं ॥ स तैश्चोचे निजं देवं । स्मर ब्रूहि यथोचिते ॥ अधुनारोपयिष्यामः । शूलिकायां भयोज्झिताः ॥ ९७ ॥ तथापि धर्मदृढधी—रुद्यतः कर्मणां क्षये ॥ प्रसन्नवदनांभोजो । मौनं तत्याज नो मुनिः ॥ ९८ ॥ यतः—दुव्वयणहणणमारण—धम्मप्भसाण बालसुहाणं ॥ लाभं मन्नइ धीरो । जहुत्तराणं अलाभंमि ॥ ९९ ॥ शुक्लध्यानाग्निसंयोगा—द्दग्धकर्मेंधनः क्षणात् ॥ स प्राप केवलज्ञानं । लोकालोकप्रकाशकं ॥ १०० ॥ शूलिकास्थानके देवै—र्निर्मितं कनकांबुजं ॥ साधुस्तत्रोपविष्टश्च । स्तूयमानोऽतिभक्तितः ॥ १ ॥ विस्मितास्ते नरा राज्ञो । वृत्तांतं तं न्यवेदयन् ॥ तं निशम्य नृपोऽप्यूचे । हा मया दुःकृतं कृतं ॥ २ ॥ निर्दोषोऽपि महात्मायं । चौरत्वेन कलंकितः ॥ मया विवेकहीनेन । लोभोपद्रुतचेतसा ॥ ३ ॥ यतः—एकं हि चक्षुरमलं सहजो विवेको । विद्वद्भिरेव गमनं सहजं द्वितीयं ॥ पुंसो न यस्य तदिह द्वयमस्ति सोंध—स्तस्यापमार्गचलने खलु कोऽपराधः ॥ ४ ॥ इत्थं विषादमापन्नः । समागत्य महीपतिः ॥ स्वापराधं निवेद्योच्चै—र्ननाम चरणौ मुनेः ॥ ५ ॥ सुरासुरनरश्रेणी—सेव्यमानपदद्वयं ॥ श्रीगुरुं हारवृत्तांतं । पप्रच्छ धरणीधवः ॥ ६ ॥ ज्ञानि-

Scanned by CamScanner

ना मुनिना सौव—पुरपित्रादिकोऽखिलः ॥ संबंधो भूपतेरग्रे । प्रोक्तो वैराग्यकारणं ॥ ७ ॥ श्येनेन तेन संबंधः । पार्श्वपादपवासिना ॥ गुरुप्रोक्तः स्वानुभूतः । शुश्रुवे निखिलोऽपि सः ॥ ८ ॥ जातजातिस्मृतिरथो । स विज्ञातभवत्रयः ॥ आत्मानं बहुधा निंदन् । महापापविधायिनं ॥ ९ ॥ विषादं परमं बिभ्रद् । वृक्षादुत्तीर्य सत्वरं ॥ मुनेः क्रमौ प्रणनाम । विनयेन विवेकवान् ॥ १० ॥ युग्मं ॥ धुन्वन्नंगं जले स्तोके । मीनवद्दीनमानसः ॥ मुखेन मुंचन्निःश्वास—श्रेणिं दुःखाश्रुपूर्णदृक् ॥ ११ ॥ तां प्रवृत्तिं स्मरन् दुःखादभूद्भूरिशुचाकुलः ॥ पच्यमानश्चणकव—न्निपतन्नुत्पतंश्च सः ॥ १२ ॥ युग्मं ॥ मयाकारि प्रमादेन । मानुष्यं दुर्लभं मुधा ॥ चिंतारत्नं दरिद्रेण । पातनेनेव सागरे ॥ १३ ॥ अथालं जीवितव्येन । विमृश्येति स्वभाषया ॥ स जगावनगारं मे—ऽनशनं देहि शर्मदं ॥१४॥ प्रददेऽनशनं तस्य । गुरुणा करुणाभृता ॥ प्रपूर्यायुर्विहंगोऽसौ । सौधर्मे त्रिदशोऽजनि ॥ १५ ॥ स्वरूपं पक्षिणो दृष्ट्वा । गुरुं पप्रच्छ भूपतिः ॥ प्रभो कोऽयमभूत्पक्षी । कथ्यतां संशयोऽस्ति मे ॥ १६ ॥ गुरुरूचे मम पितु—र्जीवोऽयं भूपतेऽभवत् ॥ यस्माच्छास्त्रे समाख्याता । विचित्रा कर्मणां गतिः ॥ १७ ॥ तं स्वरूपं समाकर्ण्य । भूपो वैराग्यमुद्वहन् ॥

राज्यं त्यक्त्वा गुरोः पार्श्वे। परिव्रज्यामुपाददे ॥ १८ ॥ चारित्रं निरतीचारं। सुचिरं परिपाल्य सः ॥ समुत्पन्नः सुरः कल्पे। पंचमे परमर्द्धिकः ॥ १९ ॥ यतः—एगदिवसंपि जीवो। पवज्जमुवागओ अनन्न-मणो ॥ जइवि न पावइ मुक्खं। अवस्स वेमाणिओ होइ ॥ २० ॥ प्रतिबोध्य चिरं भव्यान्। भूतलेऽनु-क्रमेण सः ॥ सुरप्रियोऽपि निःशेष–क्षीणकर्मा शिवं ययौ ॥ २१ ॥ त्रयाणामपि जीवाना—मात्मनिंदा फलप्रदा ॥ अभूदित्थं ततः सैव। कर्तव्या स्वस्तुतिर्न च ॥ २२ ॥ इति वीरवचः श्रुत्वा। गौतमो हर्षपूरितः ॥ सार्धं भगवता तेन ॥ विजहार वसुंधरां ॥ २३ ॥ श्रीमत्तपगणगगनां–गणदिनमणिविजय-सेनसूरीणां ॥ शिष्याणुना कथेयं। विनिर्मिता कनककुशलेन ॥ २४ ॥ ऋतुभूतरसेंदुमिते (१६५६)। वर्षे स्वान्योपकारिणी चैषा ॥ हालीवाटकनाम्नि। ग्रामे लिखिता शिवाय स्तात् ॥ २५ ॥

॥ इति श्रीसुरप्रियकथा समाप्ता ॥ श्रीरस्तु ॥



Scanned by CamScanner